वचि–उक्तः। उक्तवान्। स्वपि–सुप्तः। सुप्तवान्। यज–इष्टः। इष्टवान्। [1]वप–उप्तः। उप्तवान्। वह–ऊढः। ऊढवान्। वस–उषितः। उषितवान्। वेञ्–उतः। उतवान्। व्येञ्–संवीतः। संवीतवान्। ह्वेञ्–आहूतः। आहूतवान्। वद–उदितः। उदितवान्। टुओश्वि[2]–शूनः। शूनवान्। धातोः स्वरूपग्रहणे तत्प्रत्यये[3]कार्यं विज्ञायते। तेनेह न भवति, वाच्यति, वाचिकः [4]इति ॥

## ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च। (१६/२४१२)

'ग्रह उपादाने' (धा.पा. १५३४), 'ज्या वयोहानौ' (धा.पा. १५००), 'वेञो वयिः' (२.४.४१/२४११), 'व्यध ताडने' (धा.पा. ११८२), 'वश कान्तौ' (धा.पा. १०८१), 'व्यच् व्याजीकरणे' (धा.पा. १२९४), 'ओव्रश्चू छेदने' (धा.पा. १२९३), 'प्रच्छ ज्ञीप्सायाम्' (धा.पा. १४१४), '[5]भ्रस्ज पाके' (धा. पा. १२८५) इत्येतेषां धातूनां ङिति [6]प्रत्यये परतः चकारात् किति च संप्रसारणं भवति। [7]ग्रह–गृहीतः। गृहीतवान्। [8]ङिति–गृह्णाति जरीगृह्यते। [9]ज्या–जीनः। जीनवान्। 'ल्वादिभ्यः' (८.२.४४/३०१८) इति निष्ठानत्वम्। ङिति–जिनाति। [10]जेजीयते। 'हलः' (६.४.२/२५५९) इति [11]सम्प्रसारणदीर्घे कृते प्वादीनां (७.३.८०/२५५८) [12]इति ह्रस्वः [13]क्रियते।

वयि–[14]लिटि परतः वेञो वयिः (२.४.४१/२४११) आदेशः, तस्य ङिदभावात् किदेवोदाह्रियते। ऊयतुः। ऊयुः। यद्येवं वयिग्रहणमनर्थकम्, यजादिषु वेञ्[15]पठ्यते? नैवं शक्यम्। लिटि तस्य 'वेञः' (६.१.४०/२४१५) इति प्रतिषेधो वक्ष्यते, तत्र यथैव स्थानिवद्भावाद् [16]वयेर्विधिः एवं प्रतिषेधोऽपि प्राप्नोति? नैष दोषः। 'लिटि वयो यः' (६.१.३८/२४१३) इति यकारस्य संप्रसारणप्रतिषेधाद् वयेर्विधौ ग्रहणं प्रतिषेधे चाग्रहणमनुमास्यते? सत्यमेतत्। एष [17]एवार्थः साक्षान् निर्देशेन वयेः [18]स्पष्टीक्रियते।

व्यध–विद्धः। विद्धवान्। ङिति–विध्यति। वेविध्यते। वश–उशितः। उशितवान्। ङिति–उष्टः। उशन्ति।

व्यच–विचितः। विचितवान्। ङिति–विचति। वेविच्यते। 'व्यचेः कुटादित्वमनसि' (वा. १८) प्रतिपादितम्, तेन सर्वत्र अञ्णिति प्रत्यये सम्प्रसारणं भवति, उद्विचिता, [19]उद्विचितुम्, उद्विचितव्यम् इति। व्रश्चेः–वृक्णः। वृक्णवान्। [20]अथ कथमत्र कुत्वं,[21] व्रश्चभ्रस्ज (८.२.३६/२९४) इति हि षत्वेन भवितव्यम्?
[६६३] निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः।

---

1. वपि फ. 2. गतिवृद्ध्योः इत्यधिकम् ह. 3. कार्यविज्ञानात् सम्प्रसारणं न भवति ह. 4. इत्यत्र ब.फ.ह. 5. भ्रस्जः पाके ह. 6. प्रत्यये नास्ति क. 7. ग्रहि ह. 8. ङिति नास्ति फ. 9. ज्या नास्ति फ. 10. जेजीयते नास्ति फ. 11. सम्प्रसारणस्य दीर्घत्वे ब.क.ड.फ.ह. 12. ह्रस्वः इत्यधिकम् क. 13. क्रियते नास्ति फ. 14. ग्रहेरलिटि इति दीर्घः इत्यधिकम् क. 15. इति इत्यधिकम् क. 16. वयेर्विधौ ग्रहणं एवं विप्रतिषेधेऽपि ह. 17. एवार्थनिर्देशः क. 18. विस्पष्टीक्रियते ह. 19. उद्विचितुम् नास्ति फ. 20. अथ नास्ति ह. 21. इति इत्यधिकम् ड.